# Shri Lakshmi SuprabhAtam

# શ્રીલક્ષ્મીસુપ્રભાતમ્

## Document Information

Text title : lakShmIsuprabhAtam

File name : lakShmIsuprabhAtam.itx

Category : devii, devI, suprabhAta, lakShmI

Location : doc_devii

Transliterated by : NA

Proofread by : NA, PSA Easwaran

Latest update : May 5, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 5, 2021

*sanskritdocuments.org*

# શ્રીલક્ષ્મીસુપ્રભાતમ્

માતઃ પ્રસન્નવદનામ્બુજનિર્જિતાબ્જે
ક્ષીરાબ્ધિજે સકલલોકપવિત્રમૂર્તે ।
આર્તપ્રપન્નજનવન્દિતપાદપદ્મે
શ્રીદેવિ લક્ષ્મિ ભવતાત્તવ સુપ્રભાતમ્ ॥ ૧॥

સદ્યોવિકાસિ કુસુમેષુ સુગન્ધમત્તાઃ
ગાયન્તિ માતરમિતં ભ્રમરા યશસ્તે ।
તન્મઞ્જુનાદપરિબોધિતદિવ્યદેવિ
શ્રીદેવિ લક્ષ્મિ ભવતાત્તવ સુપ્રભાતમ્ ॥ ૨॥

સ્નાત્વામલઃ સુરગજઃ સુરદીર્ઘિકાયાં
શુણ્ડોદ્ધૃતાબ્જવિલસદ્વદનેન તૂર્ણમ્ ।
સન્તિષ્ઠતે ગૃહમુખે તવ ભક્તવર્યઃ
શ્રીદેવિ લક્ષ્મિ ભવતાત્તવ સુપ્રભાતમ્ ॥ ૩॥

શોભાં તવૈવ વદનસ્ય સદા નવીનાં
સમ્પ્રાપ્ય ભાનુરિહ લોકતમઃપ્રહન્તા ।
પ્રાચીં દિશં ભજતિ સોઽપિ તવૈવ ભક્તઃ
શ્રીદેવિ લક્ષ્મિ ભવતાત્તવ સુપ્રભાતમ્ ॥ ૪॥

પદ્માનિ સન્તિ રુચિરાણિ મનોહરાણિ
વાયુસ્તથા વહતિ મન્દગતિઃ પ્રભાતે ।
ચેતોહરીહ સુષમા પ્રકૃતેસ્તવેયં
શ્રીદેવિ લક્ષ્મિ ભવતાત્તવ સુપ્રભાતમ્ ॥ ૫॥

પૂર્વાદ્રિસાનુશિખરાત્ સમધિષ્ઠિતોઽયં
ભાનુઃ ક્ષણં લસતિ દેવિ મહાપ્રકાશઃ ।
ત્વન્મૂર્તિરાજીતકિરીટમણિપ્રકાશઃ
શ્રીદેવિ લક્ષ્મિ ભવતાત્તવ સુપ્રભાતમ્ ॥ ૬॥

ત્વદ્દર્શનાર્થમભિયાન્તિ સુરેન્દ્રમુખ્યાઃ
દેવાસ્ત્વદીયપદપઙ્કજદત્તચિત્તાઃ ।
આયોજ્ય તાન્ લસસિ કર્મચયે ત્વમેવ
શ્રીદેવિ લક્ષ્મિ ભવતાત્તવ સુપ્રભાતમ્ ॥ ૭॥

પ્રત્યગ્રપુષ્પનિચયં સ્વકરૈર્ગૃહીત્વા
ત્વત્પૂજનાય મનુજા ધૃતશુભ્રવસ્ત્રાઃ ।
આયાન્તિ મન્દિરમિતસ્તવ ભક્તિયુક્તાઃ
શ્રીદેવિ લક્ષ્મિ ભવતાત્તવ સુપ્રભાતમ્ ॥ ૮॥

પદ્મપ્રિયે રુચિરપદ્મમુખિ સ્મિતાસિ
પદ્માલયે વિજિતપદ્મવિભેત્રિ તન્વિ ।
ત્વં પાહિ નૂનમનિશં જનતાં ભયાર્તેઃ
શ્રીદેવિ લક્ષ્મિ ભવતાત્તવ સુપ્રભાતમ્ ॥ ૯॥

અમ્બ ત્વમેવ જગતાં પ્રતિમા રિરિક્ષુઃ
નિત્યોઽર્પિતા લસસિ શાશ્વતધર્મગોપ્ત્રી ।
ત્વામાશ્રિતા જહતિ દુઃખચયં હિ ભક્તાઃ
શ્રીદેવિ લક્ષ્મિ ભવતાત્તવ સુપ્રભાતમ્ ॥ ૧૦॥

માતર્મદીયહૃદયે સદયં વસાના
મજ્જીવનં હિ કુરુ સાર્થકમાત્મદીત્યા ।
ત્વામાશ્રિતો ભવતિ નૈવ વિપદ્ભયાર્તઃ
શ્રીદેવિ લક્ષ્મિ ભવતાત્તવ સુપ્રભાતમ્ ॥ ૧૧॥

ત્વં શ્રીહરેર્હૃદયમેવ સદાઽઽશ્રિતાસિ
પ્રીતિં તતો વહસિ લોકશુભાય માતઃ ।
તત્પ્રેમમૂર્તિરભયં સદયં તનોષિ
શ્રીદેવિ લક્ષ્મિ ભવતાત્તવ સુપ્રભાતમ્ ॥ ૧૨॥

પ્રેમપ્રફુલ્લનયનાન્તનરીક્ષણેન
શ્રીમન્ તનોષિ જગતાં દયયા દયાબ્ધે ।
વાત્સલ્યમૂર્તિરસિ સન્તત લોકમાતા
શ્રીદેવિ લક્ષ્મિ ભવતાત્તવ સુપ્રભાતમ્ ॥ ૧૩॥

ત્વન્નેત્રભાનુસુવિકાસિતપદ્મતલ્પો

ભાનુશ્ચકાસ્તિ ગગને સતત પ્રકાશઃ ।
નિત્યં ન ભક્તવલિની જલમધ્યભાગે
શ્રીદેવિ લક્ષ્મિ ભવતાત્તવ સુપ્રભાતમ્ ॥ ૧૪॥

મન્દસ્મિતાઙ્કુરવિભા કમનીયશોભઃ
ચન્દ્રો વિભાતિ રુચિરો નભસિ પ્રદીપ્તઃ ।
ત્વન્મન્દહાસ ઇવ ભાતિ હિ ચન્દ્રિકેયં
શ્રીદેવિ લક્ષ્મિ ભવતાત્તવ સુપ્રભાતમ્ ॥ ૧૫॥

ત્વન્નિર્મલેષુ હૃદયેષુ સદૈવ રૂઢા
તત્સંપદં ચ સતતં દ્વિગુણાં કરોષિ ।
સમ્પન્નતા ત્વમસિ મઙ્ગલદેવિ માતઃ
શ્રીદેવિ લક્ષ્મિ ભવતાત્તવ સુપ્રભાતમ્ ॥ ૧૬॥

આજન્મનઃ સકલલોકવિશિષ્ટવાઞ્છાઃ
સમ્પૂર્ય મોક્ષમપિ દેવિ ત્વમેવ દત્સે ।
ત્વામાશ્રિતોઽસ્મિ વરદાયિનિ લોકમાતઃ
શ્રીદેવિ લક્ષ્મિ ભવતાત્તવ સુપ્રભાતમ્ ॥ ૧૭॥

નારાયણસ્ય પરિપૂર્ણમહત્સ્વરૂપે
નારાયણિ પ્રિયતરે કુરુ માન્ત્રિતાર્થમ્ ।
ત્વં શ્રીહરિપ્રિયતમાસિ તદીયચિત્તા
શ્રીદેવિ લક્ષ્મિ ભવતાત્તવ સુપ્રભાતમ્ ॥ ૧૮॥

નેત્રાઞ્ચલપ્રણયવર્ષણમત્તચિત્તો
નારાયણસ્તવ સદા રમતે હૃદબ્જે ।
તત્પ્રેમમૂર્તિરસિ દેવિ સદૈવ માતઃ
શ્રીદેવિ લક્ષ્મિ ભવતાત્તવ સુપ્રભાતમ્ ॥ ૧૯॥

પશ્ચાત્ર દેવિ મુનિલોકમવિપ્રપન્નં
શ્રીસૂક્તમન્ત્રજપકોટિપવિત્રચિત્તમ્ ।
પાયાત્તમુગ્રતપસં તવ ભક્તિપૂતં
શ્રીદેવિ લક્ષ્મિ ભવતાત્તવ સુપ્રભાતમ્ ॥ ૨૦॥

પૃથ્વી-જલં-તપન-વાયુ-નભાંસિ ચાપિ
ત્વામાશ્રિતાનિ ખલુ કર્મ સુશક્તિકાનિ ।
સર્વં તવૈવ મહિમેતિ શ્રુતિ સમિત્તે

શ્રીદેવિ લક્ષ્મિ સતતં ભવતાત્ પ્રભાતમ્ ॥ ૨૧॥

શ્રુત્યન્તમૂર્ત્મિનતમાનસપદ્મપૂગે
ફુલ્લારવિન્દનિચયે ચ શિશોશ્ચ હાસે ।
ત્વં નિર્મલે વસસિ દેવિ સદૈવ ચિત્તે
શ્રીદેવિ લક્ષ્મિ ભવતાત્તવ સુપ્રભાતમ્ ॥ ૨૨॥

લક્ષ્મિ સ્વયં વસસિ શુદ્ધધનેઽત્ર લોકે
ધાન્યે તથૈવ વિજયે સ્વપરાક્રમાપ્તે ।
જ્ઞાને ચ શાન્તિસહિતે પરિપૂર્ણરૂપે
શ્રીદેવિ લક્ષ્મિ ભવતાત્તવ સુપ્રભાતમ્ ॥ ૨૩॥

સાયન્તને વસસિ નિર્મલગોસમૂહે
વત્સપ્રિયે શિશુષુ દોહનકર્મસક્તે ।
દુગ્ધેઽપિગોરિહસતા પરિપોષરૂપા
શ્રીદેવિ લક્ષ્મિ ભવતાત્તવ સુપ્રભાતમ્ ॥ ૨૪॥

ત્વં પર્વતેષુ પરિરમ્યશિખિસ્થલેષુ
પુષ્પાદિકેષુ નિબિડેષુ વનસ્થલેષુ ।
મન્દાકિનીષુ તટિનીષુ જલસ્થલેષુ
શ્રીદેવિ લક્ષ્મિ ભવતાત્તવ સુપ્રભાતમ્ ॥ ૨૫॥

પ્રાણાદિ સંયમપરેષુ સદા હૃદન્તે
નારાયણસ્પૃતિપરેષુ ચ માનવેષુ ।
માતઃ સદા લસસિ બોધમહત્સ્વરૂપા
શ્રીદેવિ લક્ષ્મિ ભવતાત્તવ સુપ્રભાતમ્ ॥ ૨૬॥

ત્વામાશ્રિતો જગતિ પુણ્યફલં સમસ્તં
સમ્પ્રાપ્નુતે તદનુમોક્ષપદં તથાન્તે ।
ત્વામાશ્રિતશ્ચ મધુસૂદનમાશ્રિતઃ સન્
શ્રીદેવિ લક્ષ્મિ ભવતાત્તવ સુપ્રભાતમ્ ॥ ૨૭॥

સમ્પ્રત્યહો મનુજબુદ્ધિરતીવ દુષ્ટા
સમ્પત્ફલાય કુરુતે ખલુ દુષ્ટયત્ના ।
સંસ્કાર્ય તાઞ્ચ જનનીવ સમુદ્ધરેસ્ત્વં
શ્રીદેવિ લક્ષ્મિ ભવતાત્તવ સુપ્રભાતમ્ ॥ ૨૮॥

ન ત્વાં વિના મનુજજન્મફલં જગત્યાં
સંપ્રાપ્નુયાં હિ સકલં વિકલા સ્વશક્ત્યા । (સંપ્રાપ્નુયાં હિ સકલાનિ સદા)
તસ્માત્ત્વમેવ પરિપાહિ દયાં કુરુષ્વ
શ્રીદેવિ લક્ષ્મિ ભવતાત્તવ સુપ્રભાતમ્ ॥ ૨૯॥

મધુમથનકટાક્ષપ્રેમભાણ્ડારરૂપા
સકલવિમલસમ્પદ્વૃદ્ધિરૂપા ચ લક્ષ્મીઃ ।
લસતુ મમ હૃદબ્જે પૂર્ણબોધાત્મના સા
દિશતુ ચ ભુવિ સર્વં યોગ્યમાત્યન્તિકં ચ ॥ ૩૦॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ।

NA, PSA Easwaran

*Shri Lakshmi SuprabhAtam*
pdf was typeset on May 5, 2021

Please send corrections to *sanskrit@cheerful.com*